# Hanumat Panjara Stotram

# हनुमत्पञ्जरस्तोत्रम्

## Document Information

Text title : Hanumat Panjara Stotram

File name : hanumatpanjarastotram.itx

Category : hanumaana, stotra, panjara

Location : doc_hanumaana

Transliterated by : NA

Proofread by : NA

Latest update : July 5, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# हनुमत्पञ्जरस्तोत्रम्

श्रीपराशरसंहितान्तर्गते चतुस्सप्ततितमः पटलः
हनुमत्पञ्जरकथनं -
पराशरः -
पञ्जरन्तु प्रवक्ष्यामि शृणु मैत्रेय ! आदरात् ॥ १॥

अस्य पञ्जरस्य ऋषिः श्रीरामचन्द्र भगवानिति च
छन्दोऽनुष्टुप् । श्रीपञ्चवक्त्रहनुमान देवतेति च । ह्रां बीजम् ।
स्वाहा शक्तिः । प्रणवो कीलकं स्मृतः । मन्त्रोक्त
देवताप्रसादसिध्यर्थे विनियोगः ।
दीर्घयामाययायुक्तैः षडङ्गैः परिकीर्तितः ।
रामदूत, वानरमुख, वायुनन्दन तथा नृसिंहमुखपूर्वकं
अञ्जनासूनुः परञ्च । गरुडमुख च तथा हरिमर्कट पदं परम् ।
क्रोडमुखं पदश्चान्तं रामकार्यधुरन्धरः ।
ततो अश्वमुखश्चान्तम् । सर्वराक्षसनाशनः ।
सर्वमुखशब्दान्ताः सर्वं चतुर्घ्यं तं गताः ।
षडङ्गे कराङ्गादयो ह्रां षड्ढादिभिस्संयुतम् । न्यसेत्सर्व मनन्यधीः ।
ततो ध्यानं पठित्वातु पूर्वोक्तमार्गतो वापि पञ्जरमारभेत्ततः ॥ २॥

आदौ प्रणवमुच्चार्य वन्दे हरिपदं ततः ।
उच्चार्य मर्कटपदं मर्कटायेति चोच्चरेत् ॥ ३॥

अग्निजायां समुच्चार्य द्वादशार्णो महामनुः ॥ ४॥

शिरः पातु मम सदा सर्वसौख्यप्रदायकः ॥ ५॥

आदौ प्रणवमुच्चार्य कपिबीजं ततोच्चरेत् ।
नृसिंहबीजमुच्चार्य गारुडञ्च समुच्चरेत् ॥ ६॥

वराहबीजमुच्चार्य हयग्रीवं ततोच्चरेन् ।

नमः पदं ततोच्चार्य स पञ्चास्य महाकपेः ।
चतुर्दशार्णमन्त्रोऽयं मुखं पायात्सदा मम ॥ ७॥

आदौ प्रणवमुच्चार्य नमो भगवते पदं ।
पञ्चवदनाय चोच्चार्य पूर्वमुखेति चोच्चरेत् ॥ ८॥

वानरं बीजमुच्चार्य कपिमुखाय चोच्चरेत् ।
सर्वशत्रुहरायेति महाबलाय चोच्चरेत् ॥ ९॥

अग्निजायां ततोच्चार्य सप्तत्रिंशाक्षराभिधः ।
कण्ठं मम सदा पातु सर्वशत्रुविनाशकः ॥ १०॥

उच्चार्यं प्रणवं चादौ नमो भगवतेतिच ।
नारसिंह महाबीज करालपदमुच्चरेत् ॥ ११॥

नृसिंहाय पदं चोक्त्वा सकलभूतप्रेतच ।
पिशाचब्रह्मराक्षस प्रमथनाय पदं वदेत् ॥ १२॥

अग्निजायां ततोच्चार्य वसु वेदार्णको मनुः ।
हृदयं मे सदा पातु सर्वशत्रुविनाशकः ॥ १३॥

ॐ नमो भगवतेति पञ्चवदनाय ततः ।
पश्चिममुखेति चोच्चार्य गारुडं बीजमुच्चरेत् ॥ १४॥

वीरगरुडाय महाबलायेति पदं ततः ।
सर्वनाग प्रमथना यान्ते सकलविषेति ॥ १५॥

हराय स्वाहा त्वं ततः वेदाभ्यक्षरसंयुतः ।
हनुमन्ममोदरं पातु सर्वरोगनिबर्हणः ॥ १६॥

ॐ नमो भगवतेति पञ्चवदनाय ततः ।
उत्तरमुखे चोज्चार्यं क्रोडवाग्बीजमुच्चरेत् ॥ १७॥

आदिवाराह सर्वसम्पत्प्रदाय निधि भूमिच ।
प्रदाय पश्चाज्ज्वरेति रोग निकृन्तन स्वाहा ॥ १८॥

नाभिं पातु मम सदा सुखसौभाग्य हेतुकः ।
नेत्र बाणार्णको मनोः पश्चात्प्रणवमुच्चरेत् ॥ १९॥

ॐ नमो भगवते पञ्चवदनाय पदं ततः ।
ऊर्ध्वमुखेत्यन्ते हयबीजं ततः परम् ॥ २०॥

हयग्रीवाय सकलप्रदाय सकलेतिच ।
जनवशीकरणाय सकल दानवान्तकाय ॥ २१॥

पश्चात्प्राज्ञाय स्वाहेति षद्दश्चाशद्वर्णको मनुः ।
मम जानुद्वयं पातु सर्व राक्षसनाशकः ॥ २२॥

ॐ च ह्रीमित्ययं चोक्त्वा नमो भगवते ततः ।
ब्रह्मास्त्रसंहारकाय राक्षसकुलनाशयेति ॥ २३॥

पताक हनुमतेति मायाबीजत्रयं ततः ।
क्रोडास्त्र वह्निजायां तं मनुः पादद्वयं मम ॥ २४॥

ह्रां नमः पञ्चवक्राय नाभिदेशं सदा मम ।
ह्रीं नमः पञ्चवक्राय पातु जङ्घद्वयं मम ।
ह्रूं नमः पञ्चवक्राय पातु जानुद्वयं मम ।
ह्रैं नमः पञ्चवक्राय पादद्वन्द्वं सदावतु ।
ह्रौं नमः पञ्चवक्राय कटिदेशं सदावतु ।
ह्रः नमः पञ्चवक्राय चोदरं पातु सर्वदा ।
ऐ नमः पञ्चवक्राय हृदयं पातु सर्वदा ।
क्लां नमः पञ्चवक्राय बाहुयुग्मं सदावतु ।
क्लीं नमः पञ्चवक्राय करयुग्मं सदा मम ।
क्लूं नमः पञ्चवक्राय कण्ठदेशं सदावतु ।
क्लैं नमः पञ्चवक्राय चुबुकं मे सदावतु ।
क्लौं नमः पञ्चवक्राय पातु चोष्ठद्वयं मम ।
क्लः नमः पञ्चवक्राय नेत्रयुग्मं सदावतु ।
रां नमः पञ्चवक्राय शोत्रयुग्मं सदावतु ।
रीं नमः पञ्चवक्राय फालं पातु महाबलः ।
रूं नमः पञ्चवक्राय शिरः पायात्सदा मम ।
रैं नमः पञ्चवक्राय शिखां मम सदावतु ।
रौं नमः पञ्चवक्राय मूर्धानं पातु सर्वदा ।
रः नमः पञ्चवक्राय मुखं पातु सदा मम ।
क्ष्रां नमः पञ्चवक्राय श्रोत्रयुग्मं सदावतु ।
क्ष्रीं नमः पञ्चवक्राय नेत्रयुग्मं सदा मम ।

क्षूं नमः पञ्चवक्राय पातु चोष्ठद्वयं मम ।
क्षैं नमः पञ्चवक्राय भ्रूयुग्मं पातु सर्वदा ।
क्षौं नमः पञ्चवक्राय नासिकां पातु सर्वदा ।
क्षः नमः पञ्चवक्राय कण्ठं पातु कपीश्वरः ।
ग्लां नमः पञ्चवक्राय पातु वक्षस्थलं मम ।
ग्लीं नमः पञ्चवक्राय बाहुयुग्मं सदा मम ।
ग्लूं नमः पञ्चवक्राय करयुग्मं सदावतु ।
ग्लैं नमः पञ्चवक्राय मम पातु वलित्रय ।
ग्लौं नमः पञ्चवक्राय चोरदं पातु सर्वदा ।
ग्लः नमः पञ्चवक्राय नाभिं पातु सदा मम ।
आं नमः पञ्चवक्राय वानराय कटिं मम ।
ईं नमः पञ्चवक्राय ऊरुयुग्मं सदावतु ।
ऊं नमः पञ्चवक्राय जानुद्वन्द्वं सदा मम ।
ऐं नमः पञ्चवक्राय गुल्फद्वन्द्वं सदावतु ।
औं नमः पञ्चवक्राय पादद्वन्द्वं सदावतु ।
अः नमः पञ्चवक्राय सर्वाङ्गानि सदावतु ॥ २५॥

वानरः पूर्वतः पातु दक्षिणे नरकेसरिः ।
प्रतीच्यां पातु गरुड उत्तरे पातु सूकरः ।
ऊर्ध्वं हयाननः पातु सर्वतः पातु मृत्युहा ॥ २६॥

वानरः पूर्वतः पातु आग्नेय्यां वायुनन्दनः ।
दक्षिणे पातु हनुमान् निर्ऋते केसरीप्रियः ॥ २७॥

प्रतीच्यां पातु दैत्यारिः वायव्यां पातु मङ्गलः ।
उत्तरे रामदासस्तु निम्नं युद्धविशारदः ॥ २८॥

ऊर्ध्वे रामसखः पातु पाताले च कपीश्वरः ।
सर्वतः पातु पञ्चास्यः सर्वरोगविकृन्तनः ॥ २९॥

हनुमान पूर्वतः पातु दक्षिणे पवनात्मजः ।
पातु प्रतीचि मक्षघ्नो उदीच्यां सागरतारकः ॥ ३०॥

ऊर्ध्वं केसरीनन्दनः पात्वधस्ताद्विष्णुभक्तः ।
पातु मध्यप्रदेशेतु सर्वलङ्का विदाहकः ॥ ३१॥

एवं सर्वतो मां पातु पञ्चवक्रः सदा कपिः ॥ ३२॥

सुग्रीवसचिवः पातु मस्तकं मम सर्वदा ।
वायुनन्दनः फालं मे महावीरः भ्रूमध्यमम् ॥ ३३॥

नेत्रे छायापहारीच पातु श्रोत्रे प्लवङ्गमः ।
कपोलौ कर्णमूलेच पातु श्रीरामकिङ्करः ॥ ३४॥

नासाग्रमञ्जनासूनुः पातु वक्रः हरीश्वरः ।
पातु कण्ठच दैत्यारिः स्कन्धौ पातुसुरार्चितः ॥ ३५॥

जानौ पातु महातेजः कूर्परौ चरणायुधः ।
नखान् नखायुधः पातु कक्षं पातु कपीश्वरः ॥ ३६॥

सीताशोकापहारीतु स्तनौ पातु निरन्तरम् ।
लक्ष्मणप्राणदाताऽसौ कुक्षि पात्वनिशं मम ॥ ३७॥

वक्षौ मुद्रापहारीच पातु भुजायुधः ।
लखिणीभञ्जनः पातु पृष्ठदेशे निरन्तरम् ॥ ३८॥

नाभिञ्च रामदासस्तु कटिं पात्वनिलात्मजः ।
गुह्यं पातु महाप्राज्ञः सन्धौ पातु शिवप्रियः ॥ ३९॥

ऊरूच जानुनी पातु लङ्काप्रासादभञ्जनः ।
जङ्घौ पातु कपिश्रेष्ठः गुल्को पातु महाबलः ॥ ४०॥

अचलोद्धारकः पातु पादौ भास्करसन्निभः ।
अङ्गान्यमितसत्वाढ्यः पातु पादाङ्गुलिस्सदा ॥ ४१॥

सर्वाङ्गानि महाशूरः पातु मां रोमवान् सदा ।
भार्यां पातु महातेजः पुत्रान् पातु नखायुधः ॥ ४२॥

पशून् पञ्चाननः पातु क्षेत्रं पातु कपीश्वरः ।
बन्धून् पातु रघुश्रेष्ठः दासः पवनसम्भवः ॥ ४३॥

सीता शोकापहारी सः गृहान् मम सदावतु ॥ ४४॥

हनूमत्पञ्जरं यस्तु पठेद्विद्वान् विचक्षणः ।
स एष पुरुषश्रेष्ठो भक्ति मुक्तिञ्च विन्दति ॥ ४५॥

कालत्रयेऽप्येककाले पठेन्मासत्रयं नरः ।
सर्वशत्रून् क्षणे जित्वा स्वयञ्च विजयी भवेत् ॥ ४६॥

अर्धरात्रौ जले स्थित्वा सप्तवारं पठेद्यदि ।
क्षयापस्मारकुष्ठादि तापज्वरनिवारणम् ॥ ४७॥

अर्कवारेऽश्वत्थमूले स्थित्वा पठति यः पुमान् ।
स पुमान् श्रियमाप्नोति सङ्ग्रामे विजयी भवेत् ॥ ४८॥

अनेन मन्त्रितं चापि यः पिबेत् रोगपीडितः ।
स नरो रोगनिर्मुक्तः सुखी भवति निश्चयः ॥ ४९॥

यो नित्यं ध्यायेद्यस्तु सर्वमन्त्रविनिर्मितम् ।
तं दृष्ट्वा देवतास्सर्वे नमस्यन्ति कपीश्वरम् ॥ ५०॥

राक्षसास्तु पलायन्ते भूता धावन्ति सर्वतः ॥ ५१॥

इदं पञ्जरमज्ञात्वा यो जपन्मन्त्रनायकम् ।
न शीघ्रं फलमाप्नोति सत्यं सत्यं मयोदितम् ॥ ५२॥

त्रिकालमेककालं वा पञ्जरं धारयेच्छुभम् ।
पञ्जरं विधिवज्जप्त्वा स्तोत्रैः वेदान्तसम्मितैः ।
तोषयेदञ्जनासूनुं सर्वराक्षसमर्दनम् ॥ ५३॥

इतीदं पञ्जरं यस्तु पञ्चवक्त्रहनूमतः ।
धारयेत् श्रावयेद्वापि कृतकृत्यो भवेन्नरः ॥ ५४॥

इति श्रीपराशरसंहितायां श्रीपराशरमैत्रेयसंवादे
श्रीपञ्चमुखहनुमत्पञ्जरं नाम चतुस्सप्ततितमः पटलः ।

*Hanumat Panjara Stotram*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*